'श्रौतं कर्म्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत्।
अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः ॥'
अन्ततः उपक्रमात् परतः। अन्यथा नित्य-
नैमित्तिकमात्रपरत्वे श्रौतस्मार्त्तभेदेनोपादानं
व्यर्थं स्यात्तयोरविशेषादेव प्रतिनिधिलाभात्।
अतएव भारतपाठादौ तथा समाचारः ॥ * ॥
स्मृत्यर्थसारे।
'नाभावस्य प्रतिनिधिरभावान्तरमिष्यते।'
सजातीयमप्यभावान्तरमभावस्य प्रतिनिधि-
र्नेष्यते। भावस्तु कदाचित्। यथोपवासादौ
ब्राह्मणभोजनादि।
'नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्।
श्रौचियाणामभोज्यञ्च यद्द्रव्यं तदशेषतः।
नाह्यं प्रतिनिधित्वेन होमकार्य्ये न कुत्रचित् ॥
द्रव्यं वैकल्पिकं किञ्चिद्यत्र सङ्कल्पितं भवेत्।
तदलाभे सदृग्ग्राह्यं न तु वैकल्पिकान्तरम् ॥
उपात्ते तु प्रतिनिधौ मुख्यार्थो लभ्यते यदि।
तत्र मुख्यमनादृत्य गौणेनैव समापयेत् ॥
संस्काराणामयोग्योऽपि मुख्य एव हि गृह्यते।
न तु संस्कारयोग्योऽन्यो गृह्यते प्रतिरूपकः ॥
मुख्ये कार्य्यासमर्थे तु सर्व्वेऽप्येतस्य नादरः।
प्रतिरूपमुपादाय प्रक्रमेणोपयुज्यते ॥
काष्ठै रूपैस्तथा पर्णैः चीरैः पुष्पैः फलैस्तथा।
गन्धै रसैः सदृग्ग्राह्यं सर्व्वालाभे परं परम् ॥
ग्राम्याणान्तु भवेद्ग्राम्यमारण्यानामरण्यजम्।
यवाभावे तु गोधूमास्तथा वेणुयवादयः ॥
हविष्ये गोघृतं ग्राह्यं तदलाभे तु माहिषम्।
आजं वा तदलाभे तु साचात्तैलं प्रयुज्यते ॥
तैलाभावे ग्रहीतव्यं तैलजं तिलसम्भवम् ॥'
तैलजं तिलसम्भवं तैलव्यतिरिक्तमपिदम्।
'तदभावे तु सर्व्वेषं कौसुम्भं सर्षपोद्भवम् ॥
वृक्षस्नेहोऽथ वा ग्राह्यः पूर्व्वाभावे परः परः।
तदभावे गवादीनां क्रमात् चीरं विधीयते ॥
तदलाभे दधि ग्राह्यमलाभे तिल इष्यते।
यत्र मुख्यं दधि चीरं तत्रापि तदलाभतः ॥
अजादेः चीरदध्यादि तदलाभे तु गोघृतम्।
मुख्यासन्नोऽथवा ग्राह्यः कार्य्यकारणसन्ततौ ॥
अतएव घृताभावे पूर्व्वं दधि ततः पयः ॥'
तथा।
'सर्व्वत्र गौणकाले कर्म्मचोदितमाचरेत्।
प्रायश्चित्तं वाहुतिभिर्हुत्वा कर्म्म समाचरेत् ॥'
मात्स्ये।
'घृतं न लभ्यते यत्र गुग्धचीरेण होमयेत्।
चीरस्य च दधि ज्ञेयं मधुनश्च गुड़ो भवेत् ॥'
आयुर्व्वेदेऽपि।
'मधु यत्र न विद्येत तत्र जीर्णगुड़ो भवेत् ॥'
पैठीनसिः। 'काण्डमूलपर्णपुष्पफलप्ररोहरस-
गन्धादीनां सादृश्येन प्रतिनिधिं कुर्य्यात्। सर्व्वा-
लाभे यवः प्रतिनिधिर्भवति।' काण्डं नालं
प्ररोहोऽङ्कुरः। 'सर्व्वालाभे यव' इति कल्पतरुः ॥
अवयव इति नारायणोपाध्यायाः। श्रान्ति-
दीपिकायां नारदीयपञ्चरात्रम्।

'अभावे चैव धातूनां हरितालं प्रशस्यते।
बीजानामप्यलाभे तु यव एको विधीयते ॥
औषधीनामलाभे तु सहदेवा प्रशस्यते।
रत्नानामप्यलाभे तु मुक्ताफलमनुत्तमम् ॥
लौहानामप्यलाभे तु हैमपात्रं प्रकल्पयेत्।'
लौहानां तैजसमात्राणाम्। न्यायप्राप्तप्रति-
निधिमधिकृत्य जैमिनिः।
'न देवताग्निशब्दक्रियाणामिति।' अस्यार्थः।
देवताया अग्नेश्च आहवनीयादेः शब्दस्य
मन्त्रस्य क्रियायाः प्रजाद्यदृष्टार्थकर्म्मणश्चादृष्ट-
मात्रार्थकत्वेन आरादुपकारकत्वान्न प्रति-
निधिः। व्रीह्यादीनान्तु सन्निपत्योपकारकाणां
पुरोडाशसाधनं दृष्टमेव प्रयोजनमिति तत्र
प्रतिनिधिरुचित इत्युक्तम्।" इत्येकादशी-
तत्त्वम् ॥ * ॥ "आरब्धकार्त्तिकादिस्नाने तु
व्याध्यादिनासामर्थ्ये पुत्त्रादिभिः प्रतिनिधिना
कारयितव्यं नानुकल्पविधिना नित्यस्नान एव
तद्विधानादिति।" इति मलमासतत्त्वम् ॥ * ॥
स्वयंकरणासामर्थ्ये अन्यद्वारा। यथा,—"दक्षः।
'स्वयं होमे फलं यत्र तदन्येन न जायते।
ऋत्विक् पुत्त्रो गुरुर्भ्राता भागिनेयोऽथ विट्-
पतिः।
एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि ॥'
विट्पतिर्जामाता। एवञ्च ऋत्विगादौतरत्र
फलन्यूनता ॥ * ॥ अचाशौचाशङ्कया बोधन-
दिनात् पूर्व्वं सूचितत्कालजीवित्वरूपाधिकारा-
भावेऽपि यद्दरणादिकं क्रियते तत् कर्म्मकाले
तस्य नारदोक्तस्वयं प्रवर्त्तनवत् प्रवर्त्तनाय न तु
तदानीं प्रतिनिधीयते। अथवा।
'निःचिप्याग्निं स्वदारेषु परिकल्प्यर्त्त्विजं तथा।
प्रवसेत् कार्य्यवान् विप्रो वृथैव न चिरं वसेत् ॥'
इति छन्दोगपरिशिष्टवदन्यत्रापि प्रतिनिधी-
यते। एवं वरणं विनापि कश्चिद्यदि ऋत्विक्
प्रवर्त्तते तथापि तत्कर्म्मसिद्धिः। दक्षिणा च
तस्मै शुचिकाले दातव्येति। तथा च नारदः।
'ऋत्विक् च त्रिविधो दृष्टः पूर्व्वजैः स्वयंकृतः।
यदृच्छया वा यः कुर्य्यादार्त्त्विज्यं प्रीतिपूर्व्वकम् ॥'
यदृच्छया स्वेच्छया।" इति तिथ्यादितत्त्वम् ॥
प्रतिपः, पुं, (प्रतिपाति पालयतीति। प्रति+
पा+कः।) शान्तनुराजपिता। इति शब्द-
रत्नावली ॥
प्रतिपचः, पुं, (प्रतिकूलः पच इति प्रादि-
समासः।) शत्रुः। इति हेमचन्द्रः। ३।३९२।
(यथा, मृच्छकटिके १० अङ्के।
"अन्योन्यं प्रतिपचसंहतिमिमां लोकस्थितिं
बोधय-
न्नेष क्रीड़ति कूपयन्त्रघटिकान्यायप्रसक्तो
विधिः ॥")
सादृश्यम्। यथा,—
"प्रतिद्वन्द्विप्रतिनिधिप्रतिपचविड़म्बकाः।"
इति काव्यचन्द्रिका ॥
प्रतिवादी च ॥

प्रतिपत्, [द्] स्त्री, (प्रतिपद्यते उपक्रम्यते-
ऽनयेति। प्रति+पद्+करणे क्विप्।) मृदङ्ग-
वाद्यम्। इति त्रिकाण्डशेषः। बुद्धिः। तिथि-
विशेषः। तत्पर्य्यायः। पच्चतिः २। इत्यमरः।
१।४।१ ॥ सा च चन्द्रस्य प्रथमकलाक्रियारूपा।
वृद्धिरूपा चेत् शुक्ला१ एकाङ्कबोधिता। ह्रास-
रूपा चेत् कृष्णा१७ सप्तदशाङ्कबोधिता ॥ * ॥
तस्या व्यवस्था यथा। "सा च कृष्णा द्वितीया-
युक्ता ग्राह्या प्रतिपत् सद्वितीया स्यादित्याप-
स्तम्बीयात्। शुक्ला अमावास्यायुता ग्राह्या।
प्रतिपदाप्यमावास्येति वचनात्। त्रिसन्ध्यव्यापि-
नीत्वे तु सर्व्वत्र न युग्मादरः। तथा च परा-
शरः।
'त्रिसन्ध्यव्यापिनी या तु सैव पुण्या सदा तिथिः।
न तत्र युग्मादरणमन्यत्र हरिवासरात् ॥'* ॥
कृष्णापि उपवासे द्वितीयायुता न ग्राह्या।
तथा च वृद्धवशिष्ठः।
'द्वितीया पञ्चमी वेधाद्दशमी च त्रयोदशी।
चतुर्द्दशी चोपवासे हन्युः पूर्व्वोत्तरे तिथी।'
द्वितीया वेधात् योगात् प्रतिपत्तृतीये हन्तीत्यर्थः।
एवमन्यत्र। अत्रोपवासपरेण विशेषविधानात्
आपस्तम्बीयसामान्यवचनस्य सङ्कोचः ॥ * ॥
कार्त्तिकशुक्लप्रतिपदमधिकृत्य बलिं प्रति भग-
वद्वाक्यम्।
'वीर! प्रतिपदा नाम तव भावी महोत्सवः।
अत्र त्वां नरशार्द्दूल! हृष्टाः पुष्टाः स्वलङ्कृताः।
पुष्पदीपप्रदानेन पूजयिष्यन्ति मानवाः ॥'
तत्र मन्त्रः।
'बलिराज! नमस्तुभ्यं विरोचनसुत प्रभो।
भविष्येन्द्र सुराराते पूजेयं प्रतिगृह्यताम् ॥'
प्रतिपदा प्रतिपत्तिथ्या। अत्र प्रतिपदि। ब्रह्म-
पुराणे तु बलिराजेतिमन्त्रस्य पूर्व्वम्।
'मन्त्रेणानेन राजेन्द्र! समन्त्री सपुरोहितः।'
इत्यर्द्धम् ॥
पश्चादपि।
'एवं पूजां नृपः कृत्वा रात्रौ जागरणं ततः।'
इत्युक्तमिति ॥
पुनर्ब्रह्मपुराणे।
'शङ्करश्च पुरा द्यूतं ससर्ज्ज सुमनोहरम्।
कार्त्तिके शुक्लपक्षे च प्रथमेऽहनि भूपते! ॥
जितश्च शङ्करस्तत्र जयं लेभे च पार्व्वती।
अतोऽर्थाच्छङ्करो दुःखी नित्यं गौरी सुखोषिता॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः ॥
पराजयो विरुद्धश्च लब्धनाशकरो भवेत् ॥'
द्यूतश्चाप्राणिभिः क्रीड़नम्। यथा मनुः।
'अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते ॥'* ॥
तत्तिथिमधिकृत्य भविष्योत्तरे।
'यो यो याहृग्भावेन तिष्ठत्यस्यां युधिष्ठिर!।
हर्षदैन्यादिना तेन तस्य वर्षं प्रयाति हि ॥'
तथा।
'महापुण्या तिथिरियं बलिराज्यप्रवर्द्धिनी।